CC-0. Digitized by eGangotri and MIDF- Delhi

॥मदत्समातिमिति अन्नामि कांउत्स्थांभांद्युथो क्षितिवितरेस्वास्पः पांउत्तम्मृत्ता॥मदत्सम्पातिमद्भुतं प्रियमिन्द्रस्य काम्यम्॥ सु
निं मेधामयासिषं स्वाहा॥ शन्नो देवीरभिष्टय आपो भवन्तु पीतये॥ श
योरभिस्रवन्तु नः॥ ततः स्वस्ति नो मिमीतामित्यादि पठन् प्रदक्षिणां राष्ट्रनाष्टदलादि विलिख्य॥ ॐ स्वस्ति नो मि
मीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः॥ स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना॥ १॥
स्वस्तये वायुमुपब्रवामहे सोमं स्वस्ति भुवनस्य यस्पतिः॥ बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवन्तु
नः॥ २॥ विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये॥ देवा अवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वं
हसः॥ ३॥ स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति॥ स्वस्ति न इन्द्रश्चाग्निश्च स्वस्ति नो अदिते कृधि॥ ४॥ स्व
स्ति पन्थामनुचरेम सूर्याचन्द्रमसाविव॥ पुनर्ददताघ्नता जानता संगमेमहि॥ ५॥ स्वस्त्ययनं ... नो
मरुद्गणं वायुं ... देवानाम्॥ अग्निमिन्द्रं वरुणं मरुद्गणं ... हेम॥ ६॥ अर्दंहोमुचमांगि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संजयं वरसत्वाय्येंथं मनसावताक्ष्ंप्रयतपाणिः शरणं प्रपद्ये स्वस्ति संवादेष्वभयं नो अस्तु ॥ पूर्वासूष्ठे दिक्षु॰ त्रातारमि
न्द्रमवितारमिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रम् ॥ ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः ॥ अग्निं दूत
मित्यग्निं ॥ अग्निं दूतं पुरो दधे हव्यवाहमुपब्रुवे ॥ देवाꣳ२ ॥ आसादयादिह ॥ यमाय त्वेति यमं ॥ यमाय त्वा मखाय त्वा
सूर्यस्य त्वा तपसे ॥ देवस्त्वा सविता मध्वानक्तु पृथिव्याः सꣳस्पृशस्पाहि ॥ अर्चिरसि शोचिरसि तपोऽसि ॥ कयानश्चि
त्रेति निर्ऋतिं ॥ कया नश्चित्र आ भुवदूती सदावृधः सखा ॥ कया शचिष्ठया वृता ॥ इमं मे इति वरुणं ॥ इमं मे वरुण
श्रुधी हवमद्या च मृडय ॥ त्वामवस्युराचके ॥ वायुरनिलमिति वायुं ॥ वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम् ॥ ॐ
क्रतो स्मर क्लिबे स्मर कृतꣳ स्मर ॥ सोमो धेनुमिति सोमं ॥ सोमो धेनुꣳ सोमो अर्वन्तमाशुꣳ सोमो वीरं कर्मण्यं द
दाति ॥ सादन्यं विदथ्यꣳ सभेयं पितृश्रवणं यो ददाशदस्मै ॥ एष ते रुद्रेति रुद्रम् ॥ एष ते रुद्र भागः सह स्वस्राम्बि
कया तं जुषस्व स्वाहा एष ते रुद्र भाग आखुस्ते पशुः ॥ मध्ये वा ॥ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

पञ्चनीराजितथाग्नीराजुप [illegible] सोम्या कारभवेयथाग्नि [illegible] पत्न्यं यज्ञा देविकाधिना ४

CC-0. Digitized by eGangotri and MIDF- Delhi

यत्कामास्ते जुहुमस्तन्नोऽअस्तु वयथ्ँ स्याम पतयो रयीणाम्॥ सूर्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुदयाँ२॥ऽ
अजस्रम्॥ तस्य पूषा प्रसवे याति विद्वान्सम्पश्यन्विश्वा भुवनानि गोपाः॥ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्॥
सनिम्मेधामयासिषथ्ँ स्वाहा॥ इति मन्त्रेण प्रजापतिं यजेत॥ ॥कस्त्वा सत्य इति दारुणि शोधयित्वा॥ ॐ कस्त्वा
सत्यो मदानाम्मर्ंहिष्ठो मत्सदन्धसः॥ दृढाचिदारुजे वसु॥ नाभिर्द्भीति स्थापयेत्॥ ॐ नाभिर्द्भिह वामहे सातौ वाज
स्य कारवः॥ त्वाम्वृत्रेष्विन्द्र सत्पतिन्नरस्त्वा काष्ठास्वर्वतः॥ अग्नाव ग्निश्चरतीत्यग्निं शोधयित्वा॥ अग्नावग्निश्चरति प्र
विष्टऽऋषीणां पुत्रोऽअभिशस्तिपावा॥ सनः स्योनः सुयजा यजेह देवेभ्यो हव्यं सदमप्रयुच्छन्स्वाहा॥ मध्ये कला
मौ तिकांस्यपात्रेऽग्निमुपसमाधाय॥ ॐ मयि गृह्णाम्यग्ने अग्निं रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय॥ मामु दे
वताः सचन्ताम्॥ ॥अग्नेः संस्कारं कुर्यात्॥ यथा॥ ॐ गर्भो अस्य इति मन्त्रं पठित्वाऽस्याग्नेर्गर्भाधानं करोमीति
पठेत्॥ गर्भोऽअस्योषधीनां गर्भो वनस्पतीनाम्॥ गर्भो विश्वस्य भूतस्याग्ने गर्भोऽअपामसि॥ एवं सर्वत्र॥८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ०स्था ३

विवस्वन्नादित्येतिउंसवनं ॥ ॐ विवस्वन्नादित्येषतेसोमपीथस्तस्मिन्मत्स्व ॥ अदस्मेनरोभवरात्समेदधातनुपदाशीर्दादिपती
वाममस्तुतः ॥ उमानुपुत्रोजायतेविन्दतेवस्वधाविश्वाहारपएधतेगृहे ॥ अजीजनोहीतिसीमन्तोनयनम् ॥ ॐ अजीज
नोहिपवमानमृत्युर्वीक्षारेशकन्नापयम् ॥ गोर्जीरयारर्त्नमाणाम्पुरन्ध्या ॥ ॥ एजतुदशमास्यइतिजातकर्म ॥ ॐ
एजतुदशमास्योगर्भोजरायुणासह ॥ यथायंवायुरेजतियथासमुद्रऽएजति ॥ एवायंदशमास्योअस्रज्जरायु
णासह ॥ यदापिपेषेतिनामकरणं ॥ यदापिपेषमातरम्पुत्रःप्रमुदितोधयन् ॥ एतत्तदग्नेऽअनृणोभवाम्य
हतौपितरौमया ॥ सम्पृचस्थसम्माभद्रेणपृङ्क्त विपृचस्थविमापाप्मनापृङ्क्त ॥ प्रथापंचाक्षरेणेतिनिष्क्रमणं ॥ ॐ
पृथापंचाक्षरेणपंक्तिदश उदजयत्ता उज्जेषं सविताषडक्षरेणषडृतूनुदजयत्तानुज्जेषं मित्रोनेवाक्ष
रेण ॥ अन्नपतेत्यन्नप्राशनम् ॥ अन्नपतेन्नस्यनोदेह्यनमीवस्यशुष्मिणः ॥ प्रप्रदातारंतारिषऽऊर्जन्नो
धेहिद्विपदेचतुष्पदे ॥ अग्नआयाहीतिचूडाकरणम् ॥ ॐ अग्नआयाहिवीतये ॥ गृणानोहव्यदातये ॥ राम: ३
सप्त
मरुतःसप्ताक्षरेणसप्तग्राम्यान्पशूनुदजयंस्तानुज्जेषं बृहस्पतिरष्टाक्षरेणगायत्रीमुदजयत्तामुज्जेषं ३

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निहोतावृसर्वाहिंषि॥ भद्रंकर्णेभिरितिकर्णवेधः॥ भद्रङ्कर्णेभिःशृणुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राः॥ स्थिरैरङ्गैस्तु
ष्टुवांसस्तनूभिर्व्यशेमहिदेवहितंयदायुः॥ अग्निरेकाक्षरेणेत्युपनयनम्॥ ॐ अग्निरेकाक्षरेणप्राणमुदजयत्तम्
उज्जेषमश्विनौद्व्यक्षरेणद्विपदोमनुष्यानुदजयतांतानुज्जेषंविष्णुस्त्र्यक्षरेणत्रींल्लोकानुदजयत्तानुज्जेषंसोमश्
चतुरक्षरेणचतुष्पदःपशूनुदजयत्तानुज्जेषंपूषापंचाक्षरेण॥ ततःप्रणवव्याहृतिसावित्रीगायत्रींश्रावयेत्॥ ॐ
भूर्भुवःस्वःवैश्वानरायविद्महेसप्तजिह्वायधीमहि॰ तन्नोवह्निःप्रचोदयात्॥ ॥गावउपेतिगोदानकर्म॥ ॐ
नाद गावउपावतावतंमहीयज्ञस्यरप्सुदा॥ उभाकर्णाहिरण्यया॥ भगस्तेतिविवाह॥ ॐ भगस्त्वभगवांश्च अस्तुदेवास्ते
नवयंभगवन्तःस्याम॥ तन्त्वाभगसर्वइज्जोहवीतिमनोभगपुरएताभवेह॥ ॥अग्निसंस्कारः॥ अग्निर्मूर्धे
तिकांस्यपात्रेणाग्निंगृहीत्वा॥ अग्निर्मूर्द्धादिवःककुत्पतिःपृथिव्याअयम्॥ अपांरेतांसिजिन्वति
॥ ऋतावानमित्यादिमंत्रैर्मंडलेस्थापितमग्निमुपसमादध्यात्॥ ॐ ऋतावानंवैश्वानरमृतस्यज्योतिषः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीः॥ इतो जातो विश्वमिदं विचष्टे वैश्वानरो यतते सूर्येण॥

अ॰स्था॰ ४ स्याति॥ अजस्रं घर्ममीमहे॥ उपयामगृहीतोसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा॥ वैश्वानरस्य सुमतौ स्याम रा
जा हि कं भुवनानामभिश्रीः॥ श्रियो वर्षं पृथ्वीमिडं सुषेम पञ्जसा॥ द्यावापृथिवी विरुणाम्यम धर्मणा विष्कभिते अजरे भू
रिरेतसा॥ उपयामगृहीतोसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा॥ वैश्वानरो न ऊतय आप्रयातु परावतः
अग्निरुक्थेन वाहसा॰ उपयामगृहीतोसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा॥ स्थिरो भवेति प्रज्वाल
येत्॥ ॐ स्थिरो भव वीड्वङ्ग आशुर्भव वाज्यर्वन्॰ पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहनः॥ आवाहयेत्वा ॐ रुक्म
कान्तं सुरासुरैर्वन्दितपादपद्मम्॥ ब्रह्मादयो यस्य मुखं वसन्ति विशालवक्त्रं ईश्वर लोकनाथ॥ ततोग्नेर्दक्षिणत
आ ब्रह्मन्निति षड्दर्भैर्ब्रह्मासनम्॥ ॐ ॥ हिरण्यगर्भ इति मंत्रस्य प्रजापतिर्ब्रह्मपवित्रकरणं॥ हिरण्यगर्भः सम शिव॰ ४
वर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्॥ स दाधार पृथिवीन्द्यामुतेमां कस्मै देवाय हविषा विधेम॥ य
स्य कूर्म शस्पात्मासनम्॥ यस्य कूर्मो गृहे हविस्तमग्ने वर्द्धया त्वम्॥ तस्मै देवा अधिब्रुवन्नयं च ब्रह्मणः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्रासादिति॥ ॐ अग्नेप्रेहीतियजमानामन्त्रम्॥ ॐ अग्नेप्रेहि प्रथमोदेवयतांचक्षुर्देवानामुतमर्त्यानाम्॥ इयक्षमाणाभृ
गुभिःसजोषाःस्वर्यन्तुयजमानाःस्वस्ति॥ ॥परिस्तृतानीस्तन्तरंततःप्रणीतासमंप्रणीतानाम्मार्गंध्येप्रोक्षणीपात्रसमंवा॥
ॐ पुरीष्यस्तृतानिपुरीष्पलुकान्पुरीषान्सर्वान्धूलिरिज्यौर्दिशोध्य॥ उपस्थायप्रथमजामृतस्यात्मनात्मानमभिसंविवेश॥ ॥
इन्द्र आसान्नेति॥ ब्राह्मणोऽङ्गुलदीर्घंचतुरङ्गुलविस्तारंचतुरश्रंकाष्ठंप्रणीतापात्रंवामहस्तेकृत्वा॥ ॥इन्द्र आसान्नेता
बृहस्पतिर्दक्षिणायज्ञःपुरएतुसोमः॥ देवसेनानामभिभञ्जतीनांजयन्तीनांमरुतोयन्त्वग्रम्॥ ॥उदुत्तममितिद
क्षिणहस्तेप्रणीतापात्रस्योदकेनप्रोक्षेत्॥ उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमंश्रथाय॥ अथावयमादित्यव्रते
तवानागसोऽअदितयेस्याम॥ ॥तत्वायामीतिऋचंउच्चार्य॥ तत्वायामिब्रह्मणावन्दमानस्तदाशास्तेयज
मानोहविर्भिः॥ अहेडमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः॥ ब्रह्मणोमुखंवमनलोकःप्रणीतास
नेस्थापयेत्॥ ॥ततोबर्हिस्स्तरणार्थंभागमादाययेतामामीनेआग्नेयादीशानान्तंब्रह्मणोऽग्निपर्यन्तंने
एकभागेनोत्तराग्रेण। द्वितीयभागेनपूर्वाग्रेण। तृतीयभागेनोत्तराग्रेण।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ॰ स्था॰ त्साहायथान्तं॰ ॐअग्निनःप्राणितापर्यन्तंपरिस्तीर्य।।येतेशतंवरुणंयेसहस्रंयज्ञियापाशावितता महान्तः।।तेभिर्नोअ
५ द्यसवितोतविष्णुर्विश्वेमुञ्चन्तुमरुतःस्वर्कास्वाहा।। ।।ततआयामीत्यर्थवेदासादनंकुर्यात्।।ततोवामिवस्त्रणाव
न्देमानुस्तदाशास्तेयजमानोहविर्भिः।।अहेडमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः।। ।।यावद्भिः
पदार्थैःप्रयोजनंतावतःपदार्थान्कुशाःप्राच्योदग्ग्रानन्यतरतःपश्चाद्वाऽऽसादयेत्।।यथा।। ।।त्र्यंबकमि
तिद्वाभ्यांकुशतरुणानि।।ॐत्र्यम्बकंयजामहेसुगन्धिंपुष्टिवर्धनम्।।उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृता
त्।। ।।पवित्रेस्थइतिमाप्रेऽनन्तर्गर्भेद्वेकुशपत्रे।।ॐपवित्रेस्थोवैष्णव्यौसवितुर्वःप्रसवउत्पुनाम्यच्छिद्रेणपवित्रे
णसूर्यस्यरश्मिभिः।। ।।इमंमेइतिवारणाद्वास्थाकुलदीर्घकरतल्लसमितरवातपप्तपञ्चाक्रांतिकमलमुकुलाकृति
वारणंपात्रम्।।इमंमेवरुणश्रुधीहवमद्याचमृडय।त्वामवस्युराचके।। ।।घृतवतीतितैजसीमृन्मयीवाद्व शां॰
शाङ्गुलविस्ताराप्रादेशोच्चाऽऽज्यस्थाली।।ॐघृतवतीभुवनानामभिश्रियोर्वीपृथ्वीमधुदुघेसुपेशसा।।द्यावापृथिवी ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निर्थुतो ष्ठिनो ष्ठुतं वसु धाम्॥ अज्ञुस्तु समादं मुद्यं त्वम्लाहाकृतं तं ष्टजन वसिष्ठि स्वधम्। ॥वहूस्थालसां प्राणितो दकस्मा
सिव्यालनपनस्त्याग्माघिनतं डुला ब्रशिदैत॥ भस्लेपतल्लस्य नोदे त्वलभीवस्य अग्निक्षामा॥ अकुलूलारंतारियुः उल्लेनो
धेहि द्विपदे चतुष्पदे॥ ॥तेजोसीत्याज्यस्थालीं॥ तेजोसि शुक्रमस्यमृतमसि धाम नामासि प्रियं देवानामनाधृष्टं दे
वयजनमसि॥ ॥पवित्राभिः प्रोक्षणीति वरुण्यालौ स्रुगपटि कोनिदध्यात्॥ ॐ पवित्रभिः पृश्नानाम्नौति पुरोडाशो हवी ॐ ष्वा
छन्दोभिस्तामिष्टिनी र्गुज्जर्पाभिर्वषट्कारान्॥ ॥धृष्टिरसीति ज्वलत्काष्ठखण्डं दक्षिणाशायां अपवर्ज्य सपवित्रामपि त्याव
हैरक्षिपेत्॥ ॐ धृष्टिरस्यपाग्ने अग्निमामादं जहि निष्क्रव्यादं सेधा देवयजं वह॥ ॥स्रुचश्च मसीति दक्षहस्तेन
स्रुवं गृहीत्वा पुनन्तु मेति प्राग्रमधोमुखमग्नेस्तापयित्वा॥ ॐ स्रुचश्च मे चमसाश्च मे वायव्यानि च मे द्रोणकलु
शश्च मे ग्रावाणश्च मेऽधिषवणे च मे पूतभृच्च म आधवनीयश्च मे वेदिश्च मे बर्हिश्च मेऽवभृथश्च मे स्वगाकारश्च
मे यज्ञेन कल्पन्ताम्॥ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः॥ पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

षट्पंचाशदधिकशतद्वयपरिमितं पराऽर्धं वा ... आहारपरिमितं वा तद्भूर्णपात्रप्रमाणम् ×१

अ॰स्था॰ ६

ड्वं। ॥पूर्णपात्राद्यमयज्ञद्रव्यादयोपकल्पनेनिदध्यात॥ ॥ततः पवित्रेस्थ इति त्रिभिः कुशतरुणैः पवित्रार्थं कुश
द्वयं प्रादेशमात्रं विच्छिन्नाग्रं कुशत्रयं आच्छिद्य पवित्रे निर्माय प्रकृष्टत्रयं परिष्कुर्यात्। ॥पवित्रेस्थो इति सपवि
त्रकरेण प्रोक्षणीपात्रं गृहीत्वा प्रणीतासन्निधौ निधाय। पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छि
द्रेण पवित्रेण सूर्यस्य रश्मिभिः॥ ॥इमं मे शान्तिपात्रान्तरेण दक्षिणहस्तेन वा प्रणीतोदकं त्रिरुत्पूय प्रोक्षण्यां क्षिपेत्॥ ॥इमं मे वरुण
श्रुधी हवमद्या च मृडय। त्वामवस्युराचके॥ ॥ततो हस्तयोरुत्पूय नासिकाभ्यां पुनरुत्पूयं पार्श्वाभ्यां प्रोक्षणीं गृहीत्वा प्रोक्षण्यु
कं वहिरुत्क्षय पवित्रे प्रोक्षिण्यां निधाय दक्षिणहस्तेनानामिकाङ्गुष्ठाभ्यामनेन मंत्रेण॥ तत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यज
मानो हविर्भिः। अहेडमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः॥ ततो नासिकाङ्गुष्ठाभ्यां गृहीतपवित्राभ्यां त्रि
द्विर्गतं कृत्वा कांश्चिदप्यङ्किवि ... प्रणीतोदकेन प्रोक्ष्य। ... देवस्य त्वेति प्रोक्षणीजलेनाज्यस्थाल्या
दिपूर्णपात्रपर्यन्तानासादितद्रव्याणि पृथक्पृथक् ... प्रोक्षणीनाम्ना ... पवित्रप्रोक्षणीपात्रं निदध्यात्। देवस्य त्वा
सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्॥ ... ॥ इति ... आज्यस्थाल्यां ... निक्षिप्य

गणः
६

CC-0. Digitized by eGangotri and MIDF- Delhi

निर्धूतेष्टिनो हतं वस्तु धाम ॥ ॐ उरुन्तरिक्षमादक्ष्मादयं वस्त्वा हाङ्कं तंश्चस्य न पश्चिष्ठयम् । ॥ ब्रह्मस्थाल्यां प्रणीतोदकमा
सिञ्चाल्पपनस्थाप्यादिनतण्डुला अवसिञ्चेत् ॥ अवधूतं रक्षो नोदेत्यत मा वस्त्वा अग्नि गाः ॥ अवनधातारं तारयित्वा उत्क्षेनो
धेहि दृढपदवत्पदे ॥ ॥ते नेतीत्यान्यस्थाली ॥ ते जोषितुकर्मस्य प्रतनुं मितिधाकुनामामापि पृथक्नेवा नामनाक्षयं दे
वयजनमसि ॥ ॥ पृथुभिः पश्चात्ते निवरुस्थाल्यां ऽगपहमोनिदध्यात् ॥ ॐ पृथुभिः पश्चनाम्नोति पुरोडाशो हवी ॐ ध्या
छन्दोभिस्तामिपेनी पुरुर्जपाभिर्व यज्ञ्यारात् । ॥ धृष्टिरसीति ज्वलत्कणाङ्गक्षिराभ्या जपवर्वा क्रमपश्चिमामपि लाव
हेमाक्षिपेत् । ॐ धृष्टिरस्यपाग्ने अग्निमामादं जहि निष्क्रव्यादं सेधा देवयजं वह ॥ ॥ ध्रुवमसि इति दृक्षाहल्ला न
ध्रुवं कृत्वा पुनन्तु मेति प्राक्श्च मधो क्रमरवमृतेनात पश्चिमे त्वा । ॐ ध्रुवमन्नवमुमाक्ष्म मेवायुमनि विन्महो गावाल
शाक्षे मेय्या बाणाक्ष्वमोधि मवसानेक्ष्मे भ्रातृव्यस्य वधाय ॥ अधवनीय स्थ मेतो दिक्षमेना हिस्यमेवकुर्थश्च मग्नागा वा स्वं
मरुतेन कल्पनाम ॥ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ॥ पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अ॰स्था॰ मवेक्षत्वा । अनिशितोसीति दक्षिणहस्तेन स्रुवं संमार्ज्य कुशाग्रैर्मूलतोग्रपर्यन्तं कुशमूलैरग्रतोधस्तान्मूलपर्यन्तं संमार्जये
८ त्॥ ॐ अनिशितोसि सपत्नक्षिद्वाजिनं त्वा वाजेध्यायै संमार्ज्मि॥ ॥प्रत्युष्टं रक्ष इति प्रतितप्योदकेनाभ्युक्ष्य॥ ॐ प्रत्यु
ष्टं रक्षः प्रत्युष्टा अरातयो निष्टप्तं रक्षो निष्टप्ता अरातयः॥ उर्वन्तरिक्षमन्वेमि॥ ॥नत्वायामीति पूर्ववत्पुनः स्थापये
त्॥ ॐ नत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः॥ अहेडमानो वरुणेह बोध्युरुशंस मा न आ
युः प्रमोषीः॥ ॥तमुत्वा दध्यङ्ङिति दक्षिणतो निदध्यात्॥ तमु त्वा दध्यङ्ङृषिः पुत्र ईधे अथर्वणः॥ वृत्रहणं पुरन्दरं
॥ ॥अथोद्वासनं तत्रायं क्रमः॥ आज्यपूर्णं स्रुवं चरोः पूर्वेणानीतान्येनोत्तरतः स्थापयित्वा॥ आज्यमग्निं प्रदक्षि
णं कारयित्वा पश्चिमतो निदध्यात्॥ तथैव चरुमानीयाज्यस्योत्तरतः स्थापयेत्॥ ॥एवमन्यान्यपि हवींषि श्रपयि
त्वोद्वासयेत्॥ ॥दधिश्रितानां प्रवरणोद्वासितानां पश्चिमतो हविष उद्वास्यानयनं॥ ॥ततः सवितुर्व इति पवि रा॰
त्राभ्यामुत्पूय॥ ॐ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः॥ ॥आत्वाहार्षमिति आज्यमवलो ८

CC-0. Digitized by eGangotri and MIDF- Delhi

ण्यतस्मादपद्ध्वनिरसनम्॥ आत्वाहार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलिः॥ विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधिभ्रशत्॥
॥ ॥ श्रोत्रस्पर्शाविषवर्ववङ्मुत्सृष्य॥ आब्रह्मन्निति ब्रह्मार्चनम्॥ आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शू
र इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्ध्रिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य
यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्
॥ ॥ इदं विष्णुरिति [illegible] विष्णुपूजनम्॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्॥ समूढमस्य पांसुरे स्वाहा॥ ॥ प्र
जापतेनेति प्रजापतिपूजनम्॥ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव। यत्कामास्ते जुहुमस्तन्
नो अस्तु वयं स्याम पतयो रयीणाम्॥ ॥ हिरण्यगर्भः समिति हिरण्यं निधाय॥ हिरण्यगर्भः समवर्त्तताग्रे भू
तस्य जातः पतिरेक आसीत्॥ स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥ ॥ ततोग्निं ध्याये
त्॥ रक्तं शक्तिस्वस्तिकाभीतिमद्भिर्दीर्घैर्दोर्भिर्धारयन्तं जपाभम्॥ हेमाकल्पं पद्मसंस्थं त्रिनेत्रं ध्यायेद्वह्निं ब

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ॰स्था॰ इमौलिंजटाभिः॥ ॥तदेवाग्निरिताग्निंप्रजयेत्॥ ॐतदेवाग्निस्तदादित्यस्तद्वायुस्तदुचन्द्रमाः॥ तदेवशुक्रंतद्ब्रह्मताआपःसप्र
८ जापतिः॥ ॥पूर्वेऋग्वेदायनमः॥ दक्षिणेॐयजुर्वेदायनमः॥ पश्चिमेॐसामवेदायनमः॥ उत्तरेअथर्ववेदायनमः॥ ॥त
तःप्रार्थना॥ नारदउवाच॥ प्रत्यङ्मुखःस्थितोवह्निःप्राङ्मुखाश्चैवऋत्विजः॥ सर्वेप्राचीमुखादेवाःकथंप्रत्यङ्मुखोऽभवत्॥ ब्रह्मो
वाच॥ आवाहयन्ततोवह्निंमंत्रपूतेनवारिणा॥ अनलश्चजलंदृष्ट्वाभीत्वाप्रत्यङ्मुखोऽभवत्॥ पावकंद्विजरूपंचत्रिनेत्रंचचतुर्भु
जं॥ त्रिशिरंसप्तजिह्वंचपञ्चलक्षणमण्डितम्॥ त्रिभागंतुमुखंतस्यअधिकंवक्त्रमध्यतम्॥ उत्तरांसेस्थितोविष्णुर्दक्षिणांसेप्रजा
पतिः॥ मध्यवक्त्रेत्वीशानएवंब्रह्मप्रभाषितम्॥ मूर्ध्निचैवतुहंब्रह्मामुखेचैवतुशङ्करः॥ जिह्वायांसंस्थितोविष्णुर्दंष्ट्रास्तुत्रय
ःस्मृताः॥ ऋग्वेदस्तुहृदिस्थानेह्यङ्गुलीषुयजुःस्मृतः॥ उदरेकटिदेशेचसामवेदःप्रकीर्तितः॥ अथर्वाजंघपादेषुग्रीवायां
प्रणवस्तथा॥ पृष्ठेचैवतुगायत्रीएवंसाङ्गंषडङ्गकम्॥ हरकमलपिंगलश्लोचनलोहिताक्षःसर्वपापप्रणाशनःश्रेष्ठंगिगोत्रा शि॰
रणितिमाताशाण्डिल्यस्तेपिताउदानकुक्षिरूर्ध्वमुखललाटः॥ कालीकरालीचमनोजवाचसुलोहिताचैवसुधूम्रवर्णा ८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥स्फुलिंगिनीविश्वरूपाववंडीलीलीलायमानाइतिसप्तजिह्वाः॥त्रिशिखचक्राक्षसूत्रदंडकमंडलुव्यग्रहस्तादिव्याभरणाभू
षितदिव्यगंधानुलेपनादिव्यएष्वैःसुपूजितअजस्कन्धसमारूढकल्पाजिनोत्तरीयकऋग्यजुःसामाथर्ववेदध्वनि
विभूषितापुरुकनामवैश्वानरआवाहितोभवतावत्तिष्ठयावद्भूलकर्मसमाप्यते॥ ॥अथकर्मविशेषेणवैश्वानरस्यना
मविशेषाः॥अग्निश्चमरुतोनामगर्भाधानेभिधीयते॥तथाउंसवनेचैवसोमस्तोजातकर्मणि॥नाम्निवैपार्थिवोन्नहि:
प्राशनेपावकःस्मृतः॥चूडायांमंगलोनामव्रतदानेसमुद्भवः॥गोदानेसूर्यनामास्याद्विवाहेयोजकस्तथा॥शान्तिके
वरुणोनामपौष्टिकेवलवर्द्धनः॥आवसथ्येभवेदग्निरग्निष्टोमेसंप्रदायकः॥वनदाहेद्भुतोनामाप्रकोष्ठेजठरःस्मृ
तः॥वायव्येदारुणोनामस्थविरेपावकस्मृतः॥क्रव्यादोमृतभक्षीचसमुद्रेवडवानलः॥युगान्तेवाक्षयोनामवल्म
ईषलयस्तथा॥ ॥इतिसर्वकर्मसाधारणमग्निस्थापनम्॥ ॥अथब्राह्मणवरणम्॥तत्रादौकुशजला
दिसहितगंधपुष्पाक्षततांबूलवस्त्राक्षपादायाग्नेःपश्चात्पूर्वाभिमुखउदङ्मुखान्ब्राह्मणान्वृणुयात्॥ॐअ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

घेत्यादिदेशकालादीन्संकीर्त्य अमुकगोत्रस्याऽमुकप्रवरस्याऽमुकशर्मणो मम श्रुतिस्मृतिपुराणोक्तफलावाप्तये वि
शेषतोऽमुककर्मनिर्विघ्नपरिसमाप्त्यर्थं गणेशपूजनार्थं तथाऽमुककर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म कर्तुं त
थाऽमुककर्मणि साङ्गभागान्तमाहवनीयद्रव्यघृतहोमकर्म कर्तुं तथाऽमुककर्मणि यद्यद्यज्ञारंभे यद्यत्कर्म विहि
तोपयोग्याचार्यकर्म कर्तुं तथाऽमुककर्मणि चतुर्वेदोक्तमंत्रजपकर्म कर्तुं नानागोत्रोत्पन्नान्नानाशर्मणो ब्राह्मणा
न्भिश्चन्दनपुष्पाक्षततांबूलवासोभिर्गणपतिब्रह्महोत्राचार्यजापकत्वेन युष्मानहं वृणे। ततो वृताः स्म इ
ति ब्रूयुः॥ ॥ततो नमोस्त्वनंतायेत्यादिमंत्रैर्दीपं संपूज्य॥ ॐ नमोस्त्वनंताय सहस्रमूर्तये सहस्रपादाक्षिशि
रोरुबाहवे। सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटियुगधारिणे नमः॥ ॥अमुककर्मनिर्विघ्नपरिसमाप्त्यर्थं
गणेशपूजनपुण्याहवाचनं च करिष्ये इति संकल्प्य॥ गणानां त्वेति गणेशं संपूज्य वक्रतुंडेति प्रार्थयेत्॥ ॐ
गणानां त्वा गणपतिं हवामहे प्रियाणां त्वा प्रियपतिं हवामहे निधीनां त्वा निधिपतिं हवामहे वसो

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

त्रिवक्तृः पंचब्राह्मणाः नृगं ... [illegible] ... ब्रह्मवाक्योद्धको
नैव ... [illegible] ... ॥

CC-0. Digitized by eGangotri and MIDF- Delhi

ममा॥ आहमंजानिगर्भधमानमंज्ञा सिगर्भधम्॥ वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ। अविघ्नं कुरु मे देव सर्वकार्येषु
सर्वदा॥ ॥अथ पुण्याहवाचनम्॥ गन्धपुष्पाक्षतताम्बूलवस्त्रादिभिर्ब्राह्मणान् संपूज्य॥ ॥प्राङ्मुखः
कृतांजलिर्भूत्वा पठेत्॥ ॥ॐ अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणो मम गृहे भो ब्राह्मणाः अमुककर्मणि पुण्याहं
भवन्तो ब्रुवन्तु इति त्रिः पठेत्॥ ब्राह्मणाश्च ॐ पुण्याहमिति त्रिः पुनन्तु मेति च पठेयुः॥ ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा
धियः। पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा॥ १॥ ॥एवं सर्वत्र॥ ॥ॐ स्वस्ति भवन्तो०॥ ॐ स्वस्ति न इन्द्रो वृद्ध
श्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥ २॥ ॥ॐ ऋद्धिं भवन्तो०
॥ॐ सुन्नस्सः ऽ अङ्गिरस्यगन्म ज्योतिरस्तृता ऽ अभ्रम्॥ दिवं पृथिव्या ऽ अध्यारुहामाविदाम देवान्त्स्वर्ज्योतिः॥ ३॥ ॥
ॐ कल्याणं भवन्तो०॥ ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः। ब्रह्मराजन्याभ्यां शूद्राय चार्याय च स्वाय च
रणाय च। प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृध्यतामुपमादो नमतु॥ ४॥ ॥ॐ शान्ति

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भवन्तो॰॥ॐ द्यौःशान्तिरन्तरिक्षंशान्तिःपृथिवीशान्तिरापःशान्तिरोषधयःशान्तिः॥वनस्पतयःशान्तिर्विश्वेदेवाःशान्ति
र्ब्रह्मशान्तिःसर्वंशान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि॥५॥ ॥ॐ श्रियंभवन्तोब्रुवन्तु॰॥ॐ मनसःकाममाकूतिंवा
चःसत्यमशीय।पशूनांरूपमन्नस्यरसोयशःश्रीःश्रयतांमयि॥६॥ ॥ततोयजमानायाशिषोदद्युः॥ ॥अथ
वेद्याईशानदिग्भागेअव्रणंतेजसंताम्रंमृण्मयंवाकलशंधान्योपरिस्थापयेत्तत्प्रकारश्चयथा॥ ॥ॐ महीद्यौरितिमन्त्रमि
मभिमन्त्रयेत्॥ॐ महीद्यौःपृथिवीचनइमंयज्ञंमिमिक्षतां॰पिपृतान्नोभरीमभिः॥ ॥धान्यमसीतिधान्यंस्थापये
त्॥ॐ धान्यमसिधिनुहिदेवान्प्राणायत्वोदानायत्वाव्यानायत्वा॰दीर्घामनुप्रसितिमायुषेधान्देवोवःसविता॰
हिरण्यपाणिःप्रतिगृभ्णात्वच्छिद्रेणपाणिनाचक्षुषेत्वामहीनांपयोसि॥ ॥आजिघ्रकलशमितिकलशंस्था
पयेत्॥ॐ आजिघ्रकलशंमह्यात्वाविशन्त्विन्दवः॥पुनरूर्जानिवर्तस्वसानःसहस्रंधुक्ष्वोरुधारापयस्वतीपुनर्मा
विशताद्रयिः॥ ॥इमंमइतितीर्थादिजलेनापूरयेत्॥ॐ इमम्मेवरुणश्रुधीहवमद्याचमृडय।त्वामवस्युराचके

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

जुण्याशी वंबा कष्ट शतेय रजनिहर्थं ॥ शरी वंधकमुला म सर्वेषि ओदल क्व ताः इति १

CC-0. Digitized by eGangotri and MIDF- Delhi

सुवर्णा रजतमुक्ता प्रवाल राज कोवर्त ॥ रत्नपञ्चकमाख्यातं सर्वकर्मसु शोभनम् इति २

॥ ॥ या ओषधीरिति सर्वौषधीः प्रक्षिपेत् ॥ ॐ या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ॥ मनै नु बभ्रूणामहं शतं धा
मानि सप्त च ॥ ॥ हिरण्यगर्भः समिति पंचरत्नानि ॥ ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् ॥ स दा
धार पृथिवीन्द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ ॥ याः फलिनीरिति फलं ॥ ॐ याः फलिनीर्या अफला अपुष्पा
याश्च पुष्पिणीः ॥ बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः ॥ ॥ यवोसीति यवान् ॥ ॐ यवोसि यवयास्मद्द्वेषो यवयारा
तीः ॥ ॥ गंधद्वारामिति गंधं ॥ गंधद्वारान्दुराधर्षां नित्यपुष्टां करीषिणीं ॥ ईश्वरीं सर्वभूतानान्तामिहोपह्वये श्रियम्
॥ ॥ काण्डात्काण्डादिति दूर्वा ॥ ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ॥ एवा नो दूर्वे प्रतनु सहस्रेण शतेन
च ॥ ॥ स्योना पृथिवीति पञ्चमृदः ॥ ॐ स्योना पृथिवि नो भवान्नृक्षरा निवेशनी ॥ यच्छा नः शर्म सप्रथाः ॥ ॥ अश्व
त्थेवेति पञ्चपल्लवैस्तान्समाछादयेत् ॥ ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ॥ गोभाज इत्किलासथ य
त्सनवथ पूरुषम् ॥ ॥ बृहस्पते अतीति वस्त्रयुग्मेन वेष्टयेत् ॥ ॐ बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुम

गजाश्वरथ्यवल्मीकात्संगमाद्ध्रदगोकुलात् ॥ राजद्वारप्रदेशाच्च मृदमानीय सप्तम इति ॥ गजाश्वरथ्य वल्मीक चतुष्पथ तडाग इत्यमः इति ३

अश्वत्थोदुम्बरप्लक्षन्यग्रोधश्चूत एव च ॥ सेरोपणकार्ये तानि पल्लवानि प्रयोजयेत् ॥ एषां त्वच कषाय एते चालेके २

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सज्जनैस्तु ॥ यद्धीरण्यं सुमनस्यमानाः अन्तप्रजातान्तदस्मा उद्विरिणान्धेहि निचम ॥ उपयामगृहीतोसि बृहस्पतये त्वैष ते योनिर्बृ
हस्पतये त्वा ॥ ॥ प्रजापतेनेति दध्यसंतेर्भ्रशायित्वा ॥ ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव । यत्कामा
स्ते जुहुमस्तन्नोऽअस्तु वयं स्याम पतयो रयीणाम् ॥ ॥ तत्त्वायामीति वरुणमावाह्य पूजयेत् ॥ ॐ तत्त्वा यामि ब्रह्मणा व
न्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेह बोध्युरुशंस मा नऽआयुः प्रमोषीः ॥ ॥ ततः कलशे गङ्गा
दीन्यावाहयेत् । सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ॥ आयान्तु यजमानस्य दुरितक्षयकारकाः ॥ ततः कलशा
भिमन्त्रणम् ॥ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रिताः । मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ
तु सागराः सर्वे सप्तद्वीपा वसुन्धरा ॥ ऋग्वेदोथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ अङ्गैश्च सहिताः सर्वे कलशं तु स
माश्रिताः ॥ ततः कलशं प्रार्थयेत् ॥ देवदानवसंवादे मथ्यमाने महोदधौ ॥ उत्पन्नोसि तदा कुंभ विधृतो विष्णुना स्व
यं ॥ त्वत्तोये सर्वतीर्थानि त्वयि देवाः प्रतिष्ठिताः ॥ त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ रुद्रश्चैव त्वमे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF - Delhi

यथा न्दूर्वाङ्कुराम्नैवं शाखा प्रशाखा स्तोकानं दशिभिर्लुहं गा स्नानाद्यमजनेति २ पीतरक्षा सूत्रं द्वेतीपसीया.

रक्षतु गोविंद आग्नेयां धरणीधरः ॥ याम्यां रक्षतु वाराहो नारसिंहस्तु नैरृते ॥ केशवो वारुणीं रक्षेत् वायव्यां मधुसूदनः ॥

रेरक्षेदेशालां तु गदाधरः ॥ उर्द्धं गोवर्धनो रक्षेदधस्तात्तु महीधरः ॥ एवं दश दिशो रक्षेद्वासुदेवो जनार्दनः ॥

रवः पृष्ठे च पद्मजं तु नाभिजः ॥ वामपार्श्वे गदा रक्षेदक्षिणे चक्रदर्शनः ॥ उपेन्द्रः पातु ब्रह्मा रामा वार्यं पातु वामनः ॥

नासि विष्णुस्त्वं च प्रजापतिः ॥ आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ त्वयि तिष्ठन्ति सर्वेपि यतः कामफलप्रदाः ॥ त्वत्प्रसा

दादिमं यज्ञं कर्तुमीहे मृहोद्भव ॥ सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥ ॥ स्थिरो भवेति स्थिरीकुर्यात् ॥ ॐ स्थिरो भव वी

ड्वङ्ग आशुर्भव वाज्यर्वन् ॥ पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहनः ॥ ॥ अथ रक्षाबन्धनपूजा ॥ रक्षोहणं वलगहनं वै

ष्णवीमिदमहं तं वलगमुत्किरामि यं मे निष्ट्यो यममात्यो निचखानेदमहं तं वलगमुत्किरामि यं मे समानो यमसं

मानो [redacted] निचखानेदमहं तं वलगमुत्किरामि यं मे सबन्धुर्यमसबन्धुर्निचखानेदमहं तं वलगमुत्कि

रामि यं मे सजातो यमसजातो निचखानोत्कृत्यां किरामि ॥ स्वराडसि सपत्नहा सत्रराडस्यभिमातिहा जनराडसि र

क्षोहा सर्वराडस्यमित्रहा ॥ रक्षोहणो वो वलगहनः प्रोक्षामि वैष्णवान्रक्षोहणो वो वलगहनो वनयामि वैष्णवान्रक्षो

हणो वो वलगहनोवस्तृणामि वैष्णवान्रक्षोहणौ वां वलगहना उपदधामि वैष्णवी वैष्णवमसि वैष्णवा स्थ ॥ ॥

ततः कलशस्कंधे गणपत्यादि देवताः स्थापयित्वा पूजयेत् ॥ यथा ॥ ॥ गणेशं आवाहयामि स्थापयामि एवं

+ रक्षोहणौ वां वलगहनोपर्ब्रूहामि वैष्णवी.

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

२- ध्रुवाध्वरस्तथासो मध्यश्चैवाभिमतो नल ॥ प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः ॥

३- धातार्यमा च मित्रश्च वरुणोंऽशो भगस्तथा ॥ इन्द्रो विवस्वान् पूषा च पर्जन्यो दशमः स्मृतः ॥ ततस्त्वष्टा ततो विष्णुर्जघन्यश्च
जघन्यजः ॥ इत्येते द्वादशादित्या नामभिः परिकीर्तिताः ॥ ४

४- वीरभद्रश्च शम्भुश्च गिरीशश्च महायशा ॥ अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः ॥ भवभावी स्वरस्थैकः कपाली च विशांपतिः ॥ स्थाणुर्भगश्च भगवान् रुद्रा एकादश स्मृताः ॥ ५

अ॰स्था॰ सर्वज्ञ॰ सूर्यं देवीं॰ शिवं॰ विष्णुं॰ विनायकं॰ दुर्गां॰ वायुं॰ आकाशं॰ अश्विनौ॰ सूर्यं॰ सोमं॰ भौमं॰ बुधं॰ बृहस्पतिं॰ शुक्रं॰ शनैश्चरं॰

१२ राहुं॰ केतुं॰ ईश्वरं॰ उमां॰ स्कंदं॰ विष्णुं॰ ब्रह्माणं॰ इन्द्रं॰ यमं॰ कालं॰ चित्रगुप्तं॰ अग्निं॰ अपः॰ क्षितिं॰ विष्णुं॰ इन्द्रं॰ इन्द्राणीं॰ प्रजाप
तिं॰ सर्पान्॰ ब्रह्माणं॰ इन्द्रं॰ अग्निं॰ यमं॰ निर्ऋतिं॰ वरुणं॰ वायुं॰ सोमं॰ ईशानं॰ ब्रह्माणं॰ अनन्तं॰ ध्रुवाद्यष्टवसून्॰ धात्रा
दिद्वादशादित्यान्॰ वीरभद्राद्येकादशरुद्रान्॰ गौर्यादिषोडशमातॄः॰ आवाहादिसप्तमरुतः॰ विनायकं॰ ब्रह्माणं॰
विष्णुं॰ रुद्रं॰ अर्कं॰ वनस्पतिं॰ वास्तुं॰ क्षेत्रपतिं॰ ॥ ततो गंधपुष्पाक्षतान् यज्ञोपवीतताम्बूलोपायन॰ फलधूप॰
माल्यधूपदीपनैवेद्यानि॰ गणेशादिदेवताभ्यो नमः इति समर्पयेत् ॥ ॥ ततः अग्नेः पश्चादुपविश्य कुशादिमादा
य ॐ अद्येत्यादि संकीर्त्य॰ अमुकगोत्रोऽमुकशर्माहं मम अमुककर्मणि॰ पूर्वमाघारान्यभागप्रजापतीन्द्राग्नीन्द
ताभ्यः ध्रुवेस्यस्येमरुणाभ्यो वरुणाग्निसवितृविष्णुविश्वदेवमरुत्वर्कवरुणप्रजापतिदेवताभ्यः प्रधानवत् ते भ्यो देवेभ्यो
गणपतिसूर्यदेवीशिवविष्णुभ्यः विनायकदुर्गावाय्वाकाशाश्विनीभ्यः सूर्यसोमभौमबुधबृहस्पतिशुक्रशनिराहुके

५- गौरी पद्मा शची मेधा सावित्री विजया जया ॥ देवसेना स्वधा स्वाहा ६- आवाहः प्रवहश्चैव उद्वहः संवहस्तथा ॥ विवहः परिवहश्चैव तथा परिवहोऽनिलः ॥ ७
स्वाहा मातरो लोकमातरः ॥ धृतिः पुष्टिस्तथा तुष्टिरात्मनः
कुलदेवताः ॥ ६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रुभ्यः ईश्वरोमास्कन्दविष्णुब्रह्मेन्द्रयमकालचित्रगुप्तेभ्यः अग्न्यप्पृथिविष्णिंद्रेंद्राणीप्रजापतिसर्पब्रह्मभ्यः इन्द्राग्नियम
निर्ऋतिवरुणवायुसोमेशानब्रह्मानन्तेभ्यः ध्रुवाद्यष्टवसुभ्यो धाताद्यादिद्वादशादित्येभ्यो वीरभद्राद्येकादशरुद्रेभ्यो गौ
र्यादिषोडशमातृभ्यः आवहादिसप्तमरुद्भ्यो विनायकब्रह्मविष्णुरुद्रार्कवनस्पतिवास्तुक्षेत्रपालदेवताभ्यः एतत्क
र्माधिष्ठातृसांगावरणस्थलदेवताभ्यः तथा चतुःस्मृतिभ्यः पृथः पंचभ्यः षड्विंशुभ्यो द्वादशदेवताभ्यो द्वादशराशि
भ्यः षड्ऋतुभ्यः षड्ऋतभ्य अयनद्वयः पंचभूतेभ्यः पंचेन्द्रियेभ्यः पंचवक्त्रेभ्यो गायत्र्यै सावित्र्यै सरस्वत्यै रमायैऽन्न
पूर्णायै महालक्ष्म्यै महारिष्टविनाशिन्यै चण्ड्यै सागंदेव्यै नमः शिवाय गोष्ठदेवाय ग्रामदेवाय स्वर्गेन्द्राय पातालवासु
कये मित्रलोकाय मांधाते तीर्थराजाय व्रतराजाय एनर्दिकालेभ्यः तिथिभ्यो वारेभ्यो नक्षत्रेभ्यो योगेभ्यः करणे
भ्यो वातेभ्यो मेघेभ्यः समुद्रेभ्यो नदीभ्यः तीर्थेभ्यः इष्टदेवेभ्यः कुलदेवेभ्यः स्थापितदेवेभ्यो भैरवाय भैरव्यै विंध्यवासि
न्यै स्थानविशेषाधिपतिदेवताभ्यः पंचपांडवेभ्यो भीमसेनाय पितृवैश्वानराग्निलिङ्गदेवताभ्यः समिद्वाज्यादि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दुंबेहेमिंयथायथासंरवयाब्राल्मणाद्वाग ऽहंकरिष्ये इतिसंकल्प्य॥ ॥उपयमनकुशान्वामहस्ते धृत्वा उत्तिष्ठन्प्रजाप
तिंमनसाध्यात्वासमिद्धतमेग्नौ समिधः प्रक्षिप्योपविश्य सपवित्रप्रोक्षण्युदकेन ईशानादि उदगपवर्गंप्रदक्षिणंकारं
यित्वा अग्निपर्युक्ष्य प्रणीतापात्रेपवित्रेनिधाय पातितदक्षिणजानुः ब्रह्मणान्वारब्धः स्रुवेणाज्यं जुहुयात्॥
तत्राघारावाज्यभागौ दक्षिणाउत्तरस्रुवावस्थितउत्तरेस्रुवेहुतशेषघृतस्यप्रोक्षणीपात्रेप्रक्षेपः कार्यः॥ ॥ॐ
प्रजापतयइतिप्रजापतिऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमेविनियोगः॥ ॐप्रजापतये स्वाहा इदंप्रजाप
तये इतिमनसा॥ ॐइन्द्रायेतिप्रजापतिऋषिस्त्रिष्टुप्छन्दः इन्द्रो देवता आज्यहोमेविनियोगः॥ ॐइन्द्रायस्वाहा
इदमिन्द्राय इत्याघारौ॥ ॐअग्नयइतिप्रजापतिऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमेविनियोगः ॐअ
ग्नयेस्वाहा इदमग्नये॥ ॐसोमायेतिप्रजापतिऋषिस्त्रिष्टुप्छन्दः सोमोदेवता आज्यहोमेविनियोगः॥ ॐसोमाय
स्वाहा इदंसोमाय॥ इत्याज्यभागौ॥ त्रिव्याहृतीनांप्रजापतिऋषिर्गायत्र्युष्णिगनुष्टुप्छन्दांस्यग्निवायुसूर्यादे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दता आज्यहोमे विनियोगः ॥ ॐ भूः स्वाहा · इदमग्नये · ॥ ॐ भुवः स्वाहा · इदं वायवे · ॥ ॐ स्वः स्वाहा · इदं सूर्याय ॥ एता
महाव्याहृतयः ॥ ॥ त्वन्नो अग्न इति वामदेव ऋषिस्त्रिष्टुप्छन्दो ऽग्नीवरुणौ देवते आज्यहोमे विनियोगः ॥ ॐ त्व
न्नो ऽग्ने वरुणस्य विद्वान्देवस्य हेडो ऽवयासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमु
ग्ध्यस्मत्स्वाहा ॥ इदमग्नीवरुणाभ्याम ॥ सत्वन्न इति वामदेव ऋषिस्त्रिष्टुप्छन्दो ऽग्नीवरुणौ देवते आज्यहोमे वि
नियोगः ॥ ॐ स त्वन्नो अग्नेवमो भवोती नेदिष्ठो ऽस्या उषसो व्युष्टौ ॥ अवयक्ष्व नो वरुणं रराणो वीहि मृडी
कं सुहवो न एधि स्वाहा ॥ इदमग्नीवरुणाभ्यां ॥ अयाश्चाग्न इति वामदेव ऋषिस्त्रिष्टुप्छन्दो ऽग्निर्देवता सर्वप्रा
यश्चित्तहोमे विनियोगः ॥ ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्वमित्वमया असि ॥ अयानो यज्ञं वहास्ययानो
धेहि भेषजं स्वाहा ॥ इदमग्नये ॥ ये ते शतमिति वामदेव ऋषिस्त्रिष्टुप्छन्दो वरुणः सविता विष्णुर्विश्वे मरुतः स्व
र्को देवता सर्वप्रायश्चित्तहोमे विनियोगः ॥ ॐ ये ते शतं वरुणं ये सहस्रं यज्ञियाः पाशा महान्तः । तेभिर्नो अद्य स

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वितोतविष्णुर्विश्वेमुंचन्तुमरुतःस्वर्काःस्वाहा॥ इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यः॥ उदुत्तम
मितिशुनःशेफऋषिस्त्रिष्टुप्छन्दोवरुणोदेवताऽक्षपाशान्मोचनेविनियोगः॥ ॐउदुत्तमंवरुणपाशमस्मदवा
धमंविमध्यमंश्रथाय॥ अथावयमादित्यव्रतेतवानागसोऽअदितयेस्यामस्वाहा॥ इदंवरुणाय॥ ॐप्रजाप
तयेस्वाहा॰ इदंप्रजापतये॥ ॥इतिपंचवारुणीहोमः॥ ॥अथप्रधानदेवताहोमः॥ गणानान्त्वा
गणपतिंहवामहेप्रियाणान्त्वाप्रियपतिंहवामहेनिधीनान्त्वानिधिपतिंहवामहेवसोमम॥ आहमजानि
गर्भधमात्वमजासिगर्भधम्॰स्वाहा॥ इदंगणपतये इतित्यागः॥ एवंसर्वत्रज्ञेयम्॥ १॥ ॐआकृष्णेनरजसा
वर्तमानोनिवेशयन्नमृतंमर्त्यंच॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन॰स्वाहा॥ इदंसूर्या
य॥ २॥ ॐदेवीद्वारोइन्द्रंसंघातेवीड्वीर्यामन्नवर्द्धयन्॥ आवत्सेनतरुणेनकुमारेणचमीवतापार्वाणं
रेणुककाटन्तुदन्तांवसुवनेवसुधेयस्यव्यन्तुयज॥ स्वाहा॥ इदंदेव्यै॥ ३॥ नमःशम्भवायचमयोभवाय

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वनमःशङ्करायवमयस्करायवनमःशिवायवशिवतरायव· स्वाहा॥ इदंशिवाय॥अत्रधृतोदकस्पर्शः॥ ४॥
विष्णोरराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि॥ वैष्णवमसि विष्णवे त्वा· स्वाहा॥ इदं विष्णवे॥५॥
॥ ॥इतिपञ्चायतनदेवानाम्॥ ॥गणानान्त्वागणपतिं हवामहे प्रियाणान्त्वा प्रियपतिं हवाम
हे निधीनान्त्वा निधिपतिं हवामहेवसोमम॥ आहमजानिगर्भधमात्वमजासिगर्भधम्॥स्वाहा॥ इदंविनाय
काय॥१॥ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन॥ ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम्· स्वा
हा॥ इदंदुर्गायै॥२॥ वातोवामनोवागन्धर्वाःसप्तविंशतिः तेऽअग्रेश्वमयुञ्जंस्तेऽअस्मिञ्जवमादधुः· स्वा
हा॥ इदंवायवे॥३॥ ऊर्द्धाऽअस्यसमिधोभवन्त्यूर्ध्वाशुक्राशोचींष्यग्नेः॥ द्युमत्तमासुप्रतीकस्यसूनोः॥स्वाहा
॥इदंआकाशाय॥४॥ यावाङ्कशामधुमत्यश्विनासूनृतावती॥ तयायज्ञंमिमिक्षताम्· स्वाहा॥ इदंअश्वि
निकुमाराभ्यां॥५॥ ॥इतिलोकपालानाम्॥ ॥ॐ आकृष्णेनरजसावर्तमानोनिवेशयन्नमृतम्

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ॰ स्था॰ १५

मैत्र॥हिरण्ययेनसविता रथेनादेवो याति भुवनानि पश्यन्॰ स्वाहा॥इदंसूर्य्याय॥१॥इमन्देवा असपत्नꣳ सुवध्वं
महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय॥इमममुष्य पुत्रममुष्यै पुत्रमस्यै विश ऽएष वो मी
रा सोमोस्माकं ब्राह्मणानाꣳ राजा॰ स्वाहा॥इदंसोमाय॥२॥अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या ऽअ
यम्॥अपाꣳ रेताꣳसि जिन्वति॰ स्वाहा॥इदंभौमाय॥३॥उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्त्ते सꣳसृजे
थामयञ्च॥अस्मिन्त्सधस्थे अध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत॰ स्वाहा॥इदंबुधाय॥४॥बृहस्पते अतियद
र्य्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु॥यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणन्धेहि चित्रम्॥उपयाम
गृहीतोसि बृहस्पतये त्वैषते योनिर्बृहस्पतये त्वा॰ स्वाहा॥इदंबृहस्पतये॥५॥अन्नात्परिस्रुतो रसं ब्रह्मणा॰
व्यपिवत्क्षत्रं पयः सोमं प्रजापतिः॥ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस ऽइन्द्रस्येन्द्रियमिदं पयोमृ
तम्मधु॥स्वाहा॥इदंशुक्राय॥६॥शन्नो देवीरभिष्टय ऽआपो भवन्तु पीतये॥शंयोरभिस्रवन्तु नः॰ स्वाहा

ग्र॰ म॰ १५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अत्रप्राशितोदकस्पर्शः ९

इदंशनैश्चराय॥ ७॥ कयानश्चित्रऽआभुवदूतीसदावृधःसखा॥ कयाशचिष्ठयावृता· स्वाहा॥ इदंराहवे॥ ८॥ केतुंकृ
ण्वन्नकेतवेपेशोमर्याऽअपेशसे॥ समुषद्भिरजायथाः स्वाहा॥ इदंकेतुभ्यः॥ ९॥ ॥इतिनवग्रहाः॥ ॥
त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्द्धनम्॥ उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात्॥ त्र्यंबकंयजामहेसुगंधिंप
तिवेदनम्॥ उर्वारुकमिवबन्धनादितोमुक्षीयमामुतः· स्वाहा॥ इदमीश्वराय॥ १॥ अत्रप्राशितोदकस्पर्शः॥ श्रीश्च
तेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम्॥ इष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मऽइषा
ण॥ स्वाहा॥ इदमुमायै॥ २॥ यदक्रन्दः प्रथमञ्जायमानऽउद्यन्त्समुद्रादुतवापुरीषात्॥ श्येनस्यपक्षाहरिण
स्यबाहूऽउपस्तुत्यम्महिजातन्तेऽअर्वन्· स्वाहा॥ इदंस्कन्दाय॥ ३॥ विष्णोरराटमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूर
सिविष्णोर्ध्रुवोसि॥ वैष्णवमसिविष्णवेत्वा॥ स्वाहा॥ इदंविष्णवे॥ ४॥ ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतः
सुरुचोवेनऽआवः॥ सबुध्न्याऽउपमाऽअस्यविष्ठाः सतश्चयोनिमसतश्चविवः॥ स्वाहा॥ इदंब्रह्मणे॥ ५॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अ॰स्था॰ त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रम्॥ ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः
१८ स्वाहा॥ इदमिन्द्राय॥६॥ असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन॥ असि सोमेन समया वि
दिवि पृक्त आहुस्ते त्रीणि दिवि बन्धनानि॥ स्वाहा॥ इतियमं॥७॥ अत्र प्राणीतोदकस्पर्शः॥ कार्षिरसि समुद्रस्य त्वा क्षि
त्या उन्नयामि॥ समापो अद्भिरग्मत समोषधीभिरोषधीः॥ स्वाहा॥ इदं कालाय॥८॥ अत्र प्राणीतोदक
स्पर्शः॥ इन्धानास्त्वा शतं हिमा द्युमन्तं समिधीमहि॥ वयस्वन्तो वयस्कृतं सहस्वन्तः सहस्कृतम्॥ अग्ने
सपत्नदम्भनमदब्धासो अदाभ्यम्॥ चित्रावसो स्वस्ति ते पारमशीय॥ स्वाहा॥ इदं चित्रगुप्ताय॥९॥
अत्र प्राणीतोदकस्पर्शः॥ ॥इत्यधिदेवानाम्॥ ॥अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे॥ देवाँ
आसादयादिह॥ स्वाहा॥ इदमग्नये॥१॥ अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे॥ गर्भे सञ्जायसे पु रामः
नः॥ स्वाहा॥ इदमपां॥२॥ स्योना पृथिवि नो भवानृक्षरा निवेशनी॥ यच्छा नः शर्म सप्रथाः॥ स्वाहा॥ इदं १८

श्रीः

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नमे ॥३॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ॥ समूढमस्य पांशुरे स्वाहा ॥ इदं विष्णवे ॥४॥ सजोषा इन्द्र सग
णो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् ॥ जहि शत्रूँ॥ रप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः ॥ उपयामगृहीतो
सीन्द्राय त्वा मरुत्वतऽएष ते योनिरिन्द्राय त्वा मरुत्वते स्वाहा ॥ इदमिन्द्राय ॥५॥ अदित्यैरास्नासीन्द्राण्या उष्णीषः
॥ पूषासि घर्माय दीष्व ॥ स्वाहा ॥ इदमिन्द्राण्यै ॥६॥ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव ॥ यत्का
मास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ॥ स्वाहा ॥ इदं प्रजापतये ॥७॥ नमोस्तु सर्पेभ्यो ये के च पृथिवी
मनु ॥ ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः स्वाहा ॥ इदं सर्पेभ्यः ॥८॥ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरु
चो वेनऽआवः ॥ स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥ स्वाहा ॥ इदं ब्रह्मणे ॥ ॥ इति प्रधानदेवा
ना ॥ ॥ ॐ त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रम् ॥ ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा
धात्विन्द्रः ॥ स्वाहा ॥ इदमिन्द्राय ॥९॥ अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे ॥ देवाँ२ ॥ आसादयादिह ॥ स्वाहा ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अस्था·
१७
व

इदमग्नये॥२॥अग्निं सुमो अस्मादितो अर्वन्तमिन्द्रितो य दैवेन वृतेन॥अग्निं सोमेन समयाविश्वक आज स्तेन्द्रीगीतादि
विवन्धनानि· स्वाहा॥इदं यमाय॥३॥अग्र पुरीतो दक्रमर्शः॥अस्तुन्वनमयजमानमिच्छस्तेन सुत्रामन्त्रीहि
तस्करस्य॥अन्यमस्मदिच्छसा तः इप्सान मो दे विनिर्ऋतेत्वमस्तु· स्वाहा॥इदं निर्ऋतये॥४॥तत्वायामि ब्रह्मणा
वन्दमानस्तदाशास्ते यजमानो हविर्भिः॥अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्रमोषीः स्वाहा॥इदं व
रुणाय॥५॥वाताय स्वाहा धूमाय स्वाहाभ्राय स्वाहा मेघाय स्वाहा विद्योतमानाय स्वाहा स्तनयते स्वाहावस्फूर्जते
स्वाहा वर्षते स्वाहा ववर्षते स्वाहोग्रं वर्षते स्वाहा शीघ्रं वर्षते स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा प्रुष्णते स्वाहा·
शीकायते स्वाहा प्रुष्वाभ्यः स्वाहा ह्रादुनीभ्यः स्वाहा नीहाराय स्वाहा॥इदं वायवे॥६॥सोमो धेनुꣳ सोमो
अर्वन्तमाशुꣳ सोमो वीरं कर्मण्यं ददाति॥सादन्यं विदथ्यꣳ सभेयं पितृश्रवणं यो ददाशदस्मै॥स्वाहा॥इदं सो
माय॥७॥तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम्॥पूषा नो वेदसा पायुरदब्धः स्वस्तये

शिव:
१७

यथा १ मसद्वृधे रक्षिता

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वाहा ॥ इदमीशानाय ॥ ८ ॥ अवक्षरणीतोदकस्पर्शः ॥ इत्यंयज्ञानं प्रथमं पुरस्तात् विसीमतः सुरुचो वेनऽआवः ॥ स
बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥ स्वाहा ॥ इदं ब्रह्मणे ॥ ९ ॥ सहस्रशीर्षा पुरुषः सहस्राक्षः
सहस्रपात ॥ स भूमिं सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ स्वाहा ॥ इदमनन्ताय ॥ १० ॥ ॥ इति दिक्पालानां
॥ ॥ युगा वो देवाः सदना अकर्म य आजग्मेदं सवनं जुषाणाः ॥ भरमाणा वहमाना हवींष्यस्मे धत्त
वसवो वसूनि स्वाहा ॥ इदं ध्रुवाद्यष्टवसुभ्यः ॥ १ ॥ यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः ॥ आ
वोर्वाची सुमतिर्ववृत्यादंहोश्चिद्या वरिवोवित्तरासदादित्येभ्यस्त्वा ॥ स्वाहा ॥ इदं धात्रादिद्वादशादित्येभ्यः
॥ २ ॥ यऽस्मितावन्तश्च भूम्यां येऽश्च दिशो रुद्रा वितस्थिरे ॥ तेषां सहस्रयोजनेवधन्वानि तन्मसि ॥ स्वा
हा ॥ इदं वीरभद्राद्येकादशरुद्रेभ्यः ॥ ३ ॥ गौरीर्मिमाय सलिलानि तक्षती ॥ स्वाहा ॥ इदं गौर्यादिषोडशमा
तृभ्यः ॥ ४ ॥ मरुतो यस्य हि क्षये पाथा दिवो विमहसः ॥ स सुगोपातमो जनः ॥ स्वाहा ॥ इदं आवाहादि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अ॰स्था॰
१८

मन्नमरुद्भः॥५॥गणानान्त्वागणपतिर्ठंहवामहेप्रियाणान्त्वाप्रियपतिर्ठंहवामहेनिधीनान्त्वानिधिपतिर्ठंहवामहेव
वसोमम॥आहमजानिगर्भधमात्वमजासिगर्भधम्॥स्वाहा॥इदंगणपतये॥६॥ब्रह्मयज्ञानंप्रथमंपुरस्ताद्वि
सीमतःसुरुचोवेनआवः॥सबुध्न्याउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवःस्वाहा॥इदंब्रह्मणे॥७॥विष्णो
रराटमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवोसि॥वैष्णवमसिविष्णवेत्वा॰स्वाहा॥इदंविष्णवे॥८॥मानस्
तोकेतनयेमानआयुषिमानोगोषुमानोअश्वेषुरीरिषः॥मानोवीरान्रुद्रभामिनोवधीर्हविष्मन्तःसदमित्वाह
वामहे॰स्वाहा॥इदंरुद्राय॥९॥अग्निरस्मिजन्मनाजातवेदाघृतम्मेचक्षुरमृतंमआसन्॥अर्कस्त्रिधातूर
जसोविमानोघर्मोहविरस्मिनाम॰स्वाहा॥इदमर्काय॥अयर्ठंहित्वास्वधितिस्तेतिजानःप्रणिनायमहतेसौ
भगाय॥अतस्त्वंदेववनस्पतेशतवल्शोविरोहसहस्रवल्शाविवयर्ठंरुहेम॰स्वाहा॥इदंवनस्पतये॥१०॥
वास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशोअनमीवोभवानः॥यत्त्वेमहेप्रतितन्नोजुषस्वशन्नोभवद्विपदेशंचतु

शिवः
१८

CC-0. Digitized by eGangotri and MIDF- Delhi

थये॥ स्वाहा॥ इदंवास्तुदेवाय॥ ४२॥ क्षत्रस्ययोनिरसिक्षत्रस्यनाभिरसि॥ मात्वाहिंसीन्मामाहिंसीः॥ स्वाहा॥ इदंक्षे
त्रपतये॥ ॥ इतिप्रधानदेवताहोमः॥ ॥ ततोविशेषदेवताहोमः॥ ॥ अथवास्तुमस्तपादयः॥ ॥ स्वस्ति
नऽइन्द्रोवृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः॥ स्वस्तिनस्तार्क्ष्योअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातुस्वाहा॥ इदंवृ
स्वस्तिभ्यः॥ पयःपृथिव्यांपयओषधीषुपयोदिव्यन्तरिक्षेपयोधाः॥ पयस्वतीःप्रदिशःसन्तुमह्यम्॥ स्वाहा॥ इदंपयः
पंचभ्यः॥ ॥ विष्णोरराटमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवोसि॥ वैष्णवमसिविष्णवेत्वा॥ स्वाहा॥ इदंवि
ष्णुभ्यः॥ ॥ अग्निर्देवतावातोदेवतासूर्योदेवताचन्द्रमादेवतावसवोदेवतारुद्रादेवतादित्यादेवतामरुतोदेव
ताविश्वेदेवाबृहस्पतिर्देवतेन्द्रोदेवतावरुणोदेवता॥ स्वाहा॥ इदंद्वादशदेवताभ्यः॥ ॥ द्यौःशान्तिरन्तरिक्षं
शान्तिःपृथिवीशान्तिरापःशान्तिरोषधयःशान्तिः॥ वनस्पतयःशान्तिर्विश्वेदेवाःशान्तिर्ब्रह्मशान्तिःसर्वंशा
न्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि॥ स्वाहा॥ इदंद्वादशशान्तिभ्यः॥ ॥ प्रातरग्निंप्रातरिन्द्रंहवामहेप्रातर्मि

Jagannath Bhattarai Collection. Nagarjun-7; Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नावरुणाभ्रातरश्विना ॥ प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातःसोममुतरुद्रं हुवेम स्वाहा ॥ इदं पंचप्रातर्भ्यः ॥ ॥ समु
द्राय त्वा वाताय स्वाहा सरिराय त्वा वाताय स्वाहा ॥ अनाधृष्याय त्वा वाताय स्वाहाप्रतिधृष्याय त्वा वाताय स्वाहा ॥ अ
वस्यवे त्वा वाताय स्वाहाशिमिदाय त्वा वाताय स्वाहा· इदं पंच वातेभ्यः ॥ ॥ अनड्वान्वयः पंक्तिश्छन्दो धेनुर्वयो ज
गती छन्दस्त्र्यविर्वयस्त्रिष्टुप्छन्दो दित्यवाड्वयो विराट् छन्दः पंचाविर्वयो गायत्री छन्दस्त्रिवत्सो वय उष्णिक्
छन्दस्तुर्यवाड्वयो नुष्टुप्छन्दो लोकं ता इन्द्रम्· स्वाहा ॥ इदं अनडुद्भ्यः ॥ ॥ भग एव भगवाँ॥ अस्तु देवास्तेन वयं भ
गवन्तः स्याम । तन्त्वा भग सर्व इज्जोहवीति स नो भग पुर एता भवेह· स्वाहा ॥ इदं पंच भगेभ्यः ॥ ॥ प्राणाय स्वा
हापानाय स्वाहा व्यानाय स्वाहा चक्षुषे स्वाहा श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा ॥ पंचेन्द्रियेभ्यः ॥ ॥ वरुण
स्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋत
सदनमासीद· स्वाहा ॥ इदं पंच वरुणेभ्यः ॥ ॥ गायत्री त्रिष्टुब्जगत्यनुष्टुप्पंक्त्या सह ॥ बृहत्युष्णिहा ककुप्सु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वीभिः समन्ता स्वाहा॥ इदं गायत्र्यै॥ ॥उपयामगृहीतोसि सावित्रोसि चनोधाश्चनोधा असि चनो मयि धेहि॥ जिन्व यज्ञं
जिन्व यज्ञपतिं भगाय देवाय त्वा सवित्रे स्वाहा॥ इदं सावित्र्यै॥ ॥सरस्वती योन्यां गर्भमन्तरश्विभ्यां पत्नी सुकृतं बिभर्ति
॥अपां रसेन वरुणो न साम्नेन्द्रं श्रियै जनयन्नप्सु राजा स्वाहा॥ इदं सरस्वत्यै॥ ॥गृहा मा बिभीत मा वेपध्वमू
र्जं बिभ्रत एमसि॥ ऊर्जं बिभ्रद्वः सुमनाः सुमेधा गृहानैमि मनसा मोदमानः॥ स्वाहा॥ इदं गृहमात्रे॥ ॥अन्नपते
न्नस्य नो देह्यनमीवस्य शुष्मिणः॥ प्रप्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे॥ स्वाहा॥ इदमन्नपूर्णायै॥ ॥
श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्॥ इष्णन्निषाणामुं म इषाण सर्वलोकं
म इषाण स्वाहा॥ इदं महालक्ष्म्यै॥ ॥देवीर्द्वारो इन्द्रं संघाते वीड्वीर्यामन्नवर्द्धयन्॥ आवत्सेन तरुणेन कुमारे
ण च मीवता पार्वाणं रेणुककाटं नुदन्तां वसुवने वसुधेयस्य व्यन्तु यज॥ स्वाहा॥ इदं महाविघ्नविनाशिन्यै॥ ॥
अम्बे अम्बिके म्बालिके न मा नयति कश्चन॥ ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम्॥ स्वाहा॥ इदं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ·स्था·

॥२०॥

वंशे॥ ॥द्यौरासीत्पूर्वचित्तिरश्वंऽआसीद्बृहद्वयः। अविरासीत्पिलिप्पिला रात्रिरासीत्पिशङ्गिला· स्वाहा॥ इदं मा
र्गदेव्यै॥ ॥भूम्या आखूनालभतेन्तरिक्षाय पाङ्क्तान्दिवे कशान्दिग्भ्यो नकुलान्बभ्रुकानवान्तरदिशाभ्यः॥ स्वाहा॥
इदं भूमिदेवाय॥ ॥नमः शम्भवाय च मयोभवाय च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च॥
स्वाहा॥ इदं गोष्ठदेवाय॥ ॥यत्कामेषु दराणपतस्माय्यायादिन्द्रिये॥ यदेनश्चकृमा वयमिदं तदवयजामहे स्वाहा
॥ इदं ग्रामदेवाय॥ ॥त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रम्॥ ह्वयामि शक्रं पुरुहूतमिन्द्रं
स्वस्ति नो मघवा धात्विन्द्रः॥ स्वाहा॥ इदं स्वर्गेन्द्राय॥ ॥नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु॥ ये अन्तरिक्षे ये दि
वि तेभ्यः सर्पेभ्यो नमः॥ स्वाहा॥ इदं पातालवासुकये॥ ॥मित्रो नऽएहि सुमित्रधऽइन्द्रस्योरुमाविश दक्षिण
मुशन्नुशन्तं स्योनः स्योनम्॥ स्वान भ्राजाङ्घारे बम्भारे हस्त सुहस्त कृशानवेते वः सोमक्रयणास्तान्रक्षध्वं मा वो
दभन· स्वाहा॥ इदं मित्रलोकाय॥ ॥राजन्तमध्वराणां गोपामृतस्य दीदिविम्॥ वर्द्धमानं स्वे दमे· स्वाहा॥ इद

शिवः

॥२०॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मांधात्रे॥ ॥येतीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः॥ तेषां सहस्रयोजनेऽवधन्वानि तन्मसि॥ स्वाहा॥ इदं ती
र्थराजाय॥ ॥व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम्॥ दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते॥ स्वाहा
इदं व्रतराजाय॥ ॥प्राच्यै दिशे स्वाहा अर्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहा अर्वाच्यै दिशे स्वाहा प्रतीच्यै दिशे स्वाहा
अर्वाच्यै दिशे स्वाहा उदीच्यै दिशे स्वाहा अर्वाच्यै दिशे स्वाहा ऊर्ध्वायै दिशे स्वाहा अर्वाच्यै दिशे स्वाहा अवाच्यै दिशे स्वाहा अर्वाच्यै दिशे
स्वाहा॥ इदं दिक्पालेभ्यः॥ ॥अग्नेः पक्षतिर्वायोर्निपक्षतिरिन्द्रस्य तृतीया सोमस्य चतुर्थ्यदित्यै पञ्चमीन्द्रा
ण्यै षष्ठी मरुतां सप्तमी बृहस्पतेरष्टम्यर्यम्णो नवमी धातुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यमस्य त्रयोद
शी॥ स्वाहा॥ इदं तिथिभ्यः॥ ॥नक्षत्रेभ्यः स्वाहा नक्षत्रियेभ्यः स्वाहा अहोरात्रेभ्यः स्वाहा अर्धमासेभ्यः स्वाहा मा
सेभ्यः स्वाहा ऋतुभ्यः स्वाहा आर्तवेभ्यः स्वाहा संवत्सराय स्वाहा द्यावापृथिवीभ्यां स्वाहा चन्द्राय स्वाहा सूर्याय स्वा
हा रश्मिभ्यः स्वाहा वसुभ्यः स्वाहा रुद्रेभ्यः स्वाहा आदित्येभ्यः स्वाहा मरुद्भ्यः स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा मूलेभ्यः स्वा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ॰ स्वा॰ हाशाखाभ्यः स्वाहा वनस्पतिभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहौषधीभ्यः स्वाहा॥ इदं नक्षत्रेभ्यः॥ ॥योगे योगे त
२१ वस्तरं वाजे वाजे हवामहे॥ सखाय इन्द्रमूतये स्वाहा॥ इदं योगेभ्यः॥ ॥आदित्यं गर्भं पयसा समङ्धि सहस्रस्य प्रति
मां विश्वरूपम्॥ परिवृङ्धि हरसा माभिमंस्थाः शतायुषं कृणुहि चीयमानः स्वाहा॥ इदं वामरेभ्यः॥ ॥भद्रं कर्णेभिः
शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः॥ स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेमहि देवहितं यदायुः स्वाहा॥ इदं क
र्णेभ्यः॥ ॥वायो ये ते सहस्रिणो रथासस्तेभिरागहि॥ नियुत्वान् सोमपीतये स्वाहा॥ इदं वातेभ्यः॥ ॥वाताय स्वाहा धूमा
य स्वाहाभ्राय स्वाहा मेघाय स्वाहा विद्योतमानाय स्वाहा स्तनयते स्वाहावस्फूर्जते स्वाहा वर्षते स्वाहाववर्षते स्वाहोग्रं व
र्षते स्वाहा शीघ्रं वर्षते स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा प्रुष्णते स्वाहा शीकायते स्वाहा प्रुष्वाभ्यः स्वाहा ह्रादुनीभ्यः
स्वाहा नीहाराय स्वाहा॥ इदं मेघेभ्यः॥ ॥समुद्रं गच्छ स्वाहान्तरिक्षं गच्छ स्वाहा देवं सवितारं गच्छ स्वाहा मित्रा शिवः
वरुणौ गच्छ स्वाहाहोरात्रे गच्छ स्वाहा छन्दांसि गच्छ स्वाहा द्यावापृथिवी गच्छ स्वाहा यज्ञं गच्छ स्वाहा सोमं २१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गच्छ स्वाहा दिवं नभो गच्छ स्वाहाग्निं वैश्वानरं गच्छ स्वाहा· मनो मे हार्दि यच्छ दिवं ते धूमो गच्छतु स्वर्ज्योतिः पृथि
वीं भस्मना पृण स्वाहा॥ इदं समुद्राय॥ ॥नदीभ्यः पौञ्जिष्ठमृक्षीकाभ्यो नैषादं पुरुषव्याघ्राय दुर्मदं गन्धर्वाप्सरोभ्यो
व्रात्यं प्रयुग्भ्य उन्मत्तं सर्पदेवजनेभ्यो प्रतिपदमयेभ्यः कितवमीर्यताया अकितवं पिशाचेभ्यो विदलकारीं यातुधा
नेभ्यः कण्टकीकारीम्· स्वाहा॥ इदं नदीभ्यः॥ ॥ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः॥ तेषां सहस्रयोज
नेव धन्वानि तन्मसि· स्वाहा॥ इदं तीर्थेभ्यः॥ ॥इष्टो यज्ञो भृगुभिराशीर्दा वसुभिः॥ तस्य न इष्टस्य प्रीतस्य द्रवि
णेहागमेः स्वाहा॥ इदं इष्टदेवाय॥ ॥कुलायिनी घृतवती पुरन्धिः स्योने सीद सदने पृथिव्याः॥ अभि त्वा रुद्रा
वसवो गृणन्त्विमा ब्रह्म पीपिहि सौभगायाश्विनाध्वर्यू सादयतामिह त्वा· स्वाहा॥ इदं कुलदेवाय॥ ॥नमः शम्भवा
य च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च स्वाहा॥ इदं भैरवाय॥ ॥देवीर्द्वार
इन्द्रं सङ्घाते वीड्वीर्यामन्नवर्द्धयन्॥ आवत्सेन तरुणेन कुमारेण च मीवता पार्वाणं रेणुककाटं नुदन्तां

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वसुवने वसुधेयस्य वेतु यज । स्वाहा ॥ इदमग्नये ॥ ॥ अम्बे अम्बिके अम्बालिके न मा नयति कश्चन । ससस्त्यश्वकः सुभ
द्रिकां काम्पीलवासिनीम् । स्वाहा ॥ इदं विन्ध्यवासिन्यै ॥ ॥ ततो यत्र यत्र स्थाने विशेषाधिष्ठितो देवो देवी वा तत्तन्मंत्रेणा
भ्यर्चयेत् ॥ ॥ एषो ह देवः प्रदिशोनु सर्वाः पूर्वो ह जातः स उ गर्भे अन्तः । स एव जातः स जनिष्यमाणः प्रत्यङ् जनास्तिष्ठति
सर्वतोमुखः ॥ शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मांश्च । शुक्रश्च ऋतपाश्चात्यंहाः ॥ स्वाहा ॥ इदं सर्व
देवेभ्यः ॥ ॥ राजन्तमध्वराणां गोपामृतस्य दीदिविं । वर्द्धमानं स्वे दमे । स्वाहा ॥ इदं पञ्चपाण्डवेभ्यः ॥ ॥ उग्रश्च भीमश्च
ध्वान्तश्च धुनिश्च । सासह्वांश्चाभियुग्वा च विक्षिपः स्वाहा ॥ इदं भीमसेनाय ॥ ॥ ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पि
तामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः । अक्षन्पितरोमीमदन्त पितरोतीतृपन्त
पितरः पितरः शुन्धध्वम् । स्वाहा ॥ इदं पितृभ्यः ॥ ॥ ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम् । अजस्रं घर्ममी एमः
महे ॥ उपयामगृहीतोसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥ वैश्वानरस्य सुमतौ स्याम राजा हि कम् २२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नानामभिश्रियो र्वी पृथ्वीमधुक्तुसेषु पत्रासा ॥ द्यावापृथिवी वरुणास्य धर्मणा ॥ विष्कभिते अजरे भूरिरेतसा ॥ उपयाम
गृहीतोसि वैश्वानराय त्वैषते योनिर्वैश्वानराय त्वा ॥ वैश्वानरेण ऋतय आपयावत्सु पराबतः ॥ अग्निरुक्थेन वाहसा ·
उपयामगृहीतोसि वैश्वानराय त्वैषते योनिर्वैश्वानराय त्वा · स्वाहा ॥ इदं वैश्वानराय ॥ ॥ अग्नये स्विष्टकृत इति
प्रजापतिऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता स्विष्टकृद्धोमे विनियोगः ॥ ॐ अग्नये स्विष्टकृते स्वाहा ॥ इदमग्नये स्वि
ष्टकृते ॥ ॥ ततः संस्रवप्राशनं ॥ ॥ आचम्य ॥ तण्डुलाद्यन्नपूर्णपात्रसहितकुशतिलाजलान्यादाय ॥ ॐ अद्य
मासादिदेशकालौ संकीर्त्य · मम कृतेनानेन [illegible]होमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थं अमुक
सम्पूर्णार्थं पूर्णपात्रं प्रजापतिदैवतं अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय ब्रह्मणे दक्षिणां संप्रददे · इति दत्त्वा
॥ ॥ ततः सुमित्रिया नऽआपऽओषधयः सन्तु · इति पवित्राभ्यां प्रणीतोदकं गृहीत्वा यजमानमभिषिच्य ॥ ॥
दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यं च वयं द्विष्मः इति ईशान्यां प्रणीतापात्रं मेशान्यां न्युब्जीकुर्यात् ॥ ॥ ततो आस्तर

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ·स्था गाङ्क्रमेणाज्ञ्यान्ध्याप्य वृत्ता न्कामान् ॥ देवा गातुविदो गातुं वित्त्वा गातुमित ॥ मनसस्पत इमन्देव यज्ञं स्वाहा वाते धाः
२३ इति जुहुयात् ॥ ॥ स्रुवश्च मे चमसाश्च मे वायव्यानि च मे द्रोणकलशश्च मे ग्रावाणश्च मे धिषवणे च मे पूतभृच्च म आ
धवनीयश्च मे वेदिश्च मे बर्हिश्च मे वभृथश्च मे स्वगाकारश्च मे यज्ञेन कल्पन्ताम् · इति मन्त्रेण स्रुवं सम्पूज्य ॥ ॥ फलपु
ष्पवस्त्रसहितं स्रुवं गृहीत्वोत्थाप्य ॥ मूर्द्धानं दिवः सदसस्पतिमित्यादि · पुनस्त्वादि मन्त्रैः पूर्णाहुतिं कुर्यात् ॥ ॐ मूर्द्धा
नं दिवो अरतिं पृथिव्या वैश्वानर आ जातमग्निं ॥ कविं सम्राजमतिथिं जनानामासन्न पात्रं जनयन्त देवाः ॥ १
सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ॥ सनिं मेधामयासिषं स्वाहा ॥ २ ॥ यां मेधां देवगणाः पितरश्चोपा
सते ॥ तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा ॥ ३ ॥ मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः ॥ मेधामिन्द्र शिवः
श्च वायुश्च मेधां धाता ददातु मे स्वाहा ॥ ४ ॥ इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम् ॥ मयि देवा दधतु श्रियमुत्तमां २३
तस्यै ते स्वाहा ॥ ५ ॥ पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः ॥ घृतेन त्वन्तन्वं वर्द्धय

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वसत्याः सन्तु यजमानस्य कामाः ॥८॥ ॥एधोस्येति घृताभिघारितबिल्वहोमः ॥ एधोस्येधिषीमहि समिदसि तेजोसि
तेजो मयि धेहि ॥ समाववर्ति पृथिवी समुषाः समु सूर्यः समु विश्वमिदं जगत् ॥ वैश्वानरज्योतिर्भूयासं विभून्कामान्व्य
श्नवै भूः स्वाहा ॥ ॥अप्यादधामीत्यग्निं पूजयेत् ॥ अप्यादधामि समिधमग्ने व्रतपते त्वयि ॥ व्रतं च श्रद्धां चोपैमीन्धे
त्वा दीक्षितो अहम् ॥१॥ यत्र ब्रह्म च क्षत्रं च सम्यञ्चौ चरतः सह ॥ तं लोकं पुण्यं प्रज्ञेषं यत्र देवाः सहाग्निना ॥२॥ य
त्रेन्द्रश्च वायुश्च सम्यञ्चौ चरतः सह । तं लोकं पुण्यं प्रज्ञेषं यत्र सेदिर्न विद्यते ॥३॥ ॥यज्ञ यज्ञं गच्छेति विसर्जये
त् ॥ यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा ॥ एष ते यज्ञो यज्ञपते सहसूक्तवाकः सर्ववीरस्तं जुषस्व
स्वाहा ॥ ॥द्यौः शान्तिरिति दुग्धेन वाहं अभिषिंचेत् ॥ द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरो
षधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सा मा शान्ति
रेधि ॥ ॥आयुष्मानिति आयुष्यं जपेत् ॥ ॐ आयुष्यं जमदग्नेः कश्यपस्य त्र्यायुषं यद्देवेषु त्र्यायुषं तन्नो

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अ॰स्था॰
२४

[illegible] ॥ ॥ततः क्षेत्रपालाय बलिं दत्वा॥
ततो महाबलिं कुंकुमादिरक्तरक्तपुष्पादियुक्तं सदीपं सवस्त्रं सदक्षिणां क्षेत्रपालाय दद्यात्॥ ततः मंत्रः॥ क्षेत्रपा
लाय भूतप्रेतपिशाचराक्षसशाकिनीडाकिनीवेतालादिपरिवारयुताय इमं बलिं समर्पयामि॥ भो भो क्षेत्रपा
ल इमं बलिं गृहाण मम यजमानस्य आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिदो भव॥ इमं बलिं शूद्रेण ब्राह्मणेन वा
चतुष्पथे क्षिपेत्॥ ॥ध्रुवासीति घृतमभिमंत्र्य॥ ध्रुवासि ध्रुवोयं यजमानो स्मिन्नायतने प्रजया पशुभिर्भूया
त्॥ घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्य छदिरसि विश्वजनस्य छाया॥ ॥घृतच्छायापश्यनेन मंत्रेण॥ अ
लक्ष्मीर्यच्च दौःस्थ्यं मे सर्वगात्रेष्ववस्थितं॥ तत्सर्वं नाशमायातु त्वं लक्ष्मीं पुष्टिं च वर्द्धय॥ ॥ततो गोदानं॥ इरावती
धेनुमती हि भूतं सूयवसिनी मनवे दशस्या॥ व्यस्कभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः स्वाहा॥ श्रीः
॥ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च॥ नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः॥ इत्यादि मंत्रैर्गोस २४

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पूज्य ॥ कुशजलसहितं गोपुच्छं गृहीत्वा · ॐ देवा मनुष्याः ऋषयः पितरः पन्नगाः खगाः · गंधर्वाः किन्नराः सिद्धा
साध्या रुद्रा मरुद्गणाः · स्थावरा जंगमाश्चैव ये चान्ये लोकवासिनः · दानवा यक्षरक्षांसि भूतप्रेतपिशाचकाः ·
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः ॥ इति संतर्प्य ॥ ॥ ब्राह्मणान् संपूज्य प्रार्थयेत् ॥ वेदमूर्तिधरो विप्रवि
ष्णुरूपस्स्वयमागतः · त्वत्प्रसादात्कृतं कर्म परिपूर्णं भवेन्मम ॥ सतिलजलं कुशं गोपुच्छमादाय ॥ ॐ अद्येहम्
मत्कृतेन होमकर्मणः सांगतासिद्ध्यर्थं इमां गां रुद्रदैवतां अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय वाचायतुभ्यम
हं संप्रददे ॥ गवामंगेषु तिष्ठन्ति भुवनानि चतुर्दश · यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च · इति दद्यात् ॥ अद्य
कृतेन होदानप्रतिष्ठार्थं सुवर्णं वह्निदैवतं अमुकगोत्राय इत्यादि · ॥ ततो यथाशक्ति भूदानं · सुवर्णदानं · वस्त्र
दानं · अन्नदानं ॥ ॥ कुशादीन्यादाय · अद्य कृतेन दस्य होमकर्मणः सांगतासिद्ध्यर्थं · यथासंख्याकब्रा
ह्मणभोजनं करिष्ये · इति संकल्प्य · दक्षिणाद्रव्यमादाय · अद्य कृतेन दस्य होमकर्मणः सांगतासिद्ध्य

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ·स्था· र्थं न्यूनातिरेकपरिपूरणार्थं भूयसीं दक्षिणां नानागोत्रेभ्यो नानाशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दक्षिणा
२५ त्वेन दातुमहमुत्सृजे ॥ ॥ततो यस्य स्मृत्या च· कायेन वाचेति मंत्रौ पठित्वा· कर्मेश्वरार्पणं कुर्यात् ॥ यस्य स्मृ
त्या च नामोक्त्या तपोयज्ञक्रियादिषु· न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥ कायेन वाचा मनसेन्द्रियैर्वा
बुध्यात्मना वा प्रकृतेः स्वभावात् ॥ करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयेत्तत् ॥ ॥आवाहि
तदेवानां पुनरागमनाकांक्षा· यान्तु देवेति विसृज्य· यान्तु देवगणाः सर्वे पूजामादाय पार्थिव· इष्टकामस
मिद्ध्यर्थं पुनरागमनाय च ॥ ॥ततोऽग्नेः पश्चिमतः पीठोपरि वस्त्रलिखितभद्रासनोपरि विष्टं सपरिवारं
यजमानं शान्तिकलशोदकेनाम्रपल्लवेनाभिषिंचेयुः ॥ अभिषेकमंत्राश्च ॥ सर्वे समुद्राः सरितस्तीर्थानि
जलदा नदाः· आयान्तु यजमानस्य दुरितक्षयकारकाः ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो शां:
हस्ताभ्याम् ॥ सरस्वत्यै वाचो यन्तुर्यन्त्रिये दधामि बृहस्पतेष्ट्वा साम्राज्येनाभिषिञ्चाम्यसौ ॥ देवस्य त्वा २५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम॥सरस्वत्यैवाचोयन्तुर्यन्त्रियेणाग्नेःसाम्राज्येनाभिषिञ्चामि॥देवस्य
त्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम॥अश्विनोर्भैषज्येनतेजसेब्रह्मवर्चसायाभिषिञ्चामिसरस्वत्यै
भैषज्येनवीर्य्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेणबलायश्रियैयशसेभिषिञ्चामि॥कोसिकतमोसिकस्मै
त्वाकायत्वा॥सुश्लोकसुमङ्गलसत्यराजन्॥शिरोमेश्रीर्यशोमुखंत्विषिःकेशाश्चश्मश्रूणि॥राजामेप्राणोऽअमृ
तᳫसम्राट्चक्षुर्विराट्श्रोत्रम॥जिह्वामेभद्रंवाङ्महोमनोमन्युःस्वराड्भामः॥मोदाःप्रमोदाऽअङ्गुलीरङ्गानिमित्रंमे
सहः॥बाहूमेबलमिन्द्रियᳫहस्तौमेकर्मवीर्यम्॥आत्माक्षत्रमुरोमम॥पृष्ठीर्मेराष्ट्रमुदरमᳫसौग्रीवाश्चश्रो
णी॥ऊरूऽअरत्नीजानुनीविशोमेङ्गानिसर्वतः॥नाभिर्मेचित्तंविज्ञानंपायुर्मेपचितिर्भसत्॥आनन्दनन्दा
वाण्डौमेभगःसौभाग्यंपसः॥जङ्घाभ्यांपद्भ्यांधर्मोस्मिविशिराजाप्रतितिष्ठितः॥प्रतिक्षत्रेप्रतितिष्ठामिराष्ट्रेप्रत्य
श्वेषुप्रतितिष्ठामिगोषु॥प्रत्यङ्गेषुप्रतितिष्ठाम्यात्मन्प्रतिप्राणेषुप्रतितिष्ठामिपुष्टेप्रतिद्यावापृथिव्योः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ·स्व· प्रतीतं न स्वामि यज्ञे ॥ त्रया देवा एकादश त्रयस्त्रिंशाः सुराधसः ॥ बृहस्पतिपुरोहिता देवस्य सवितुः सवे । देवा
२६ देवैरवन्तु मा ॥ प्रथमा द्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाः ॥ सत्येन सत्यं यज्ञेन यज्ञो यजुर्भिर्यजूंषि ७ सामभिः
सामानि ऋग्भिरृचः पुरोनुवाक्याभिः पुरोनुवाक्या याज्याभिर्याज्या वषट्कारैर्वषट्कारा आहुतिभिराहुत
यो मे कामान्त्समर्द्धयन्तु भूः स्वाहा ॥ द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः
वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ स्वस्ति न
इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ तच्चक्षु
र्देवहितं पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतं प्रब्रवाम शरदः एम·
शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥ ७ ॥ [illegible] इन्द्रो [illegible] स्वस्ति नः पूषा विश्ववेदाः
[illegible] स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु [illegible] देवमावन्दुरिता [illegible] परायुक्ता [illegible] २६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi